M-552

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M552 विषय स्तोत्र

नांव नृसिंहभुजंगस्तोत्र MSS

लेखक/लिपीकार —

पृष्ठ 2

काळ — पूर्ण/अपूर्ण

M-552

श्रीशुंबंदे॥ नृसिंहायनमः॥ सदादुग्धसिंधुं स्थितंश्वेतभद्रंमोलस
द्रत्नदेवालयेरम्यचित्रे॥ शशांकाभरलान्विते सिंहपीठे हिशाया
तपत्रंनृसिंहंस्मरामि॥१॥ जगज्जन्मभंगस्थितीनांहेतुभूतं स्वरू
पापरिज्ञानतोवास्तुवंतत्॥ स्वतोनिर्विकारंध्रुवंशांतमूर्तिपरब्र
ह्मरूपंनृसिं०॥२॥ असंगंसदोनिर्भयंशुद्धसंवित्स्वरूपंनिराधारमा
कारशून्यं॥ निरस्ताखिलानर्थमात्मानमेकंसदानंदरूपंनृ
सिंहंस्मरामि॥३॥ नगम्यंप्रमाणांतरैर्निर्गुणत्वाद्विधानेतरा
भ्यांश्रुतिर्बोधयेद्यं॥ विनिद्रंविशोकंसदामोहहूरंभ्रमात्संबनं
तंनृसिंहंस्मरामि॥४॥ समस्तांत्रिलोकींसृजत्यत्तिपाति
स्वरज्ज्वाहयस्मा[illegible]द्भुहंयःकरोति॥ स्वयंनिर्विकाराद्विती
यःप्रसन्नःस्वमायायरूपंनृसिंह०॥५॥ नैकैकंदिनेनापिब्रा न२
ह्मैर्नभद्रमावबध्यंबरात्सर्वतोक्षेणधातुः॥ सुदर्शनरवा

ग्रैस्तु यो दैत्यराजं ददाराति वीरं नृसिंहं स्मरामि ॥६॥ सदा
स्वर्गमर्त्यातलाद्यप्रपंचं परिव्याप्य सर्वात्मनावस्थितो यः
नभो यत्स्वरूपं ह्यमापरिछिन्नमंतर्महा विष्णुरूपं नृसिं० ॥७
ज्वलन्नर्कचंद्राग्निभादिप्रविश्य स्वतेजोबलात्तेषु शक्तिं
निधाय ॥ सदा ज्वालयेद्यः स्वतो निःप्रकंपस्तमाद्यं ज्वलंतं
नृसिंह० ॥८॥ अनश्नोपि सर्वत्रगः सर्वभोक्ता प्रवक्तायादर्दी
नस्पृष्टाखत्तरजोश्च ॥ विजानाति वेद्यं स्वतो सर्वतो वै मुखं
विश्वरूपं नृसिं० ॥९॥ नरार्द्धं मृगेंद्रार्द्धदेहं गृहीत्वा स्वभक्त
प्रणीतं प्रमाणी चिकीर्षुः ॥ रुषा निर्गतस्तंभतो गर्जमानो
विचित्राकृतिं तं नृ० ॥१०॥ सदायद्भयाद्वाति साम्यं नभस्वान्नु
दैत्यस्तमेति स्वकाले विवस्वान् ॥ पचत्यग्निरिंद्रः करोसेवव

ष्टिं महाभीषणं तं नृसिं० ॥११॥ यमाश्रित्य सर्वे शुभं प्राप्नुवंति श्रियापुत्रपौत्राद्यवि
च्छिन्नयेरु ॥ शरीरे विलीने विशंति स्वरूपं परं भद्ररूपं नृ० ॥१२॥ स्मृतो भक्तियुक्तैः
सदा मारयेद्यो ऽपमृत्युं च कालमृत्युं स्वकाले तिकाले ॥ जरामृत्युं भ्रमन्यं तुरीयं पुराणं
विभुं मृत्युमृत्युं नृसिंहं० ॥१३॥ सुरा दानवा मानवा सिद्धसंघा नमंति प्रपन्नाः
सदा नसराये ॥ अपारं भवाब्धिं तरीतुं प्रवृत्ता नमस्कार्यरूपं नृ० ॥१४॥ कि
रीटप्रभाभासिताशेषलोकं स्फुरन्मौलि दिव्यस्रजं नीलकंठं ॥ रणत्कंकणालं
कृतं मुद्रिकाभिः परिभ्राजमानं नृ० ॥१५॥ तडिद्वर्णकौशेयवासो वसानं वसा
नं स्फुरन्मेखलाकुंडलं सत्कुनासं ॥ स्वभक्तारिदानवानलं कुंदगौरं शशांका
र्धमौलिं नृ० ॥१६॥ पिनाकाभयाभीष्टचक्रांकहस्तं कटिप्रोल्लसत्किंकिणी
जालमालं ॥ क्वणन्नूपुरानर्घ्यकेयूरहारश्रिया शोभितं श्रीनृ० ॥१७॥
नखोदीर्णदैत्याग्रनिप्रख्यावक्षःस्थरक्तैः सकारुण्यशेषगात्रं ॥ प्रलंबांत्रमालं
महाभीमदंष्ट्रं महारौद्ररूपं नृसिंहं स्मरामि ॥१८॥ सदाभार संध्यादिलाशेष
गात्रं ललज्जिह्वघोराट्टहासोद्भवक्त्रं ॥ रवींद्वग्निनेत्रं त्रयाद्योरवह्निं वमंतं
त्वघोरं नृसिंहं स्मरामि ॥१९॥ सहस्राणि विधींद्रादयो न प्रवक्तुं गुणं ते समर्थाः
कुतस्तन्मनुष्यः ॥ तवानुग्रहात्वद्वचः प्रेरितोहं प्रवृत्तोपराधं क्षमस्वाधि

२

देव ॥२०॥ पुरानेकजन्मान्यखंडात्मबोधं समुद्दिश्य चीर्णानि तपो लक्षणानि ॥
तवानुग्रहेणान्यथा स्वेकृतस्तत्प्रपन्नार्तिहारिन्नमस्ते नृसिंह ॥२१॥ सदा
प्रातरुत्थाय यः श्रीनृसिंहं स्मरन्मानवो भक्तियुक्तः प्रपन्नः ॥[illegible]॥ दुरंता
रण्यभूम्यग्निचौरालातलादीन हि स्यारिष्टजातं न यस्य किंचित् ॥२३॥ इमं स्तसं
वं यः पठेदर्थपूर्वं सभुक्त्वेह भोगानन्यथा काममंते ॥ शरीरे विलीने नृसिंह
सादात्स्वखंडात्मबोधं विशेदात्मतत्वं ॥२४॥ इयं स्तोत्रमाला कृता पद्य
रत्नात्तदुग्राहिकाप्यप्रसन्नेर्विचित्रा ॥ परब्रह्मणि श्रद्धयात्मस्वरूपे नृ
सिंहार्पिता स्तौत्रिलोकीं पुनातु ॥२५॥ इति श्रीशंकराचार्यविरचितं
नृसिंहभुजंगस्तोत्रं संपूर्णं ॥ श्रीमद्रघुनाथचरणारविंदाभ्यान्नमः ॥

२